## श्रीषड्गोस्वाम्यष्टकम् in Hindi

कृष्णोत्कीर्तन-गान-नर्तन-परौ प्रेमामृताम्भोनिधी
धीराऽधीरजन-प्रियौ प्रियकरौ निर्मत्सरौ पूजितौ ।
श्रीचैतन्यकृपाभरौ भुवि भुवो भारावहन्तारको
वन्दे रूप-सनातनौ रघुयुगौ श्रीजीव-गोपालकौ ॥1॥
नानाशास्त्र-विचारणैक-निपुणौ सद्धर्म-संस्थापकौ
लोकानां हितकारिणौ त्रिभुवने मान्यौ-शरण्याकरौ ।
राधाकृष्ण-पदारविन्द-भजनानन्देन मत्तालिको
वन्दे-रूप सनातनौ रघुयुगौ श्रीजीव-गोपालकौ ॥2॥

श्रीगौराङ्ग-गुणानुवर्णन-विधौ श्रद्धा-समृद्धयान्वितौ
पापोत्ताप-निकृन्तनौ तनुभृतां गोविन्द-गानामृतैः ।
आनन्दाम्बुधि-वर्धनैक-निपुणौ कैवल्य-निस्तारको
वन्दे रूप-सनातनौ रघुयुगौ श्रीजीव-गोपालकौ ॥3॥

त्यक्त्वा तूर्णमशेष-मण्डलपति-श्रेणीं सदा तुच्छवत्
भूत्वा दीनगणेशकौ करुणया कौपीन-कन्याश्रितौ ।
गोपीभाव-रसामृताब्धि-लहरी-कल्लोळ-मग्नौ मुहुः
वन्दे रूप-सनातनौ रघुयुगौ श्रीजीव-गोपालकौ ॥4॥

कूजत्-कोकिल-हंस-सारस-गणाकीर्णे मयूराकुले
नानारत्न-निबद्ध-मूल-विटप-श्रीयुक्त-वृन्दावने ।
राधाकृष्णमहर्निशं प्रभजतौ जीवार्थदौ यौ मुदा
वन्दे रूप-सनातनौ रघुयुगौ श्रीजीव-गोपालकौ ॥5॥

संख्यापूर्वक-नामगाननतिभिः कालावसानीकृतौ
निद्राहार-विहारकादि-विजितौ चात्यन्त-दीनौ च यौ ।
राधाकृष्ण-गुणस्मृतेर्मधुरिमानन्देन सम्मोहितौ
वन्दे रूप-सनातनौ रघुयुगौ श्रीजीव-गोपालकौ ॥6॥

राधाकुण्ड-तटे कलिन्द-तनया तीरे च वंशीवटे
प्रेमोन्माद-वशादशेष-दशया ग्रस्तौ प्रमत्तौ सदा ।
गायन्तौ च कदा हरेर्गुणवरं भावाविभूतौ मुदा
वन्दे रूप-सनातनौ रघुयुगौ श्रीजीव-गोपालकौ ॥7॥

हे राधे! ब्रजदेविके! च ललिते! हे नन्दसूनो! कुतः
श्रीगोवर्धन-कल्पपादप-तले कालिन्दिवन्ये कुत: ।
घोषन्ताविति सर्वतो ब्रजपुरे खेदैर्महाविह्वलौ
वन्दे रूप-सनातनौ रघुयुगौ श्रीजीव-गोपालकौ ॥**8**॥

## Sri Sad-Goswamyastakam in English

**Krishnotkirtana-Gana-Nartana-Parau Premamritambhonidhi
Dhiradhira-Jana-Priyou Priyakaru Nirmatsarau Pujitou.
Shri-Chaitanya-Kripabharau Bhuvi Bhuvo Bharavahantarako
Vande Rupa-Sanatanau Raghu-Yugau Shri-Jiva-Gopalakau.**

**Nanashastra-Vicharanai-Nipunau Saddharma-Samsthapakau
Lokanam Hitakarinu Tribhuvane Manya-Sharanyakarau.
Radha-Krishna-Padaravinda-Bhajanananandena Mattaliko
Vande Rupa-Sanatanau Raghu-Yugau Shri-Jiva-Gopalakau.**

**Shri-Gauranga-Gunanvarnan-Vidhau Shraddha-Samriddhyanvitau
Papottapa-Nikrintanau Tanubhrtam Govinda-Ganamritaih.
Anandambudhi-Vardhanaika-Nipunau Kaivalya-Nistarako
Vande Rupa-Sanatanau Raghu-Yugau Shri-Jiva-Gopalakau.**

**Tyaktva Turnamashesha-Mandalapati-Shrenim Sada Tuchchavat
Bhutva Dinaganeshakau Karunayau Kaupin-Kanyashritau.
Gopibhava-Rasamritabdhil-Lahari-Kallola-Magnau Muhuh
Vande Rupa-Sanatanau Raghu-Yugau Shri-Jiva-Gopalakau.**

**Kujat-Kokila-Hansa-Sarasa-Ganakirne Mayurakule
Nanaratna-Nibaddha-Mula-Vitapa-Shri Yukta-Vrindavane.
Radha-Krishna-Maharnisham Prabhajatao Jivarthadau Yau Muda
Vande Rupa-Sanatanau Raghu-Yugau Shri-Jiva-Gopalakau.**

**Sankhya-Purvaka-Namagan-Natibhih Kalavasanikritau
Nidra-Ahara-Viharakadi-Vijitau Chatyanta-Dinau Cha Yau.
Radha-Krishna-Guna-Smrter-Madhurimanandena Sammohitau
Vande Rupa-Sanatanau Raghu-Yugau Shri-Jiva-Gopalakau.**

**Radha-Kunda-Tate Kalinda-Tanaya Tire Cha Vamshivatae
Premonmada-Vashadashesha-Dashaya Grastau Pramattau Sada.
Gayantau Cha Kada Harer-Gunavaram Bhavavibhutau Muda
Vande Rupa-Sanatanau Raghu-Yugau Shri-Jiva-Gopalakau.**

**He Radhe! Brajadevike! Cha Lalite! He Nandasuno! Kutah**
**Shri-Govardhan-Kalp-Padapa-Tale Kalindi-Vanye Kutah.**
**Ghoshantaviti Sarvato Brajapure Khedair-Maha-Vihvalau**
**Vande Rupa-Sanatanau Raghu-Yugau Shri-Jiva-Gopalakau.**